दिनाङ्क :-14.11.2024

प्रात: - 06:55

**झारखण्डप्रचार:**

झारखण्डराज्यस्य विभिन्नेषु भागेषु मतदानं शान्तिपूर्वकं सञ्जातम्। प्रथमचरणस्य विधानसभानिर्वाचनस्य कठिनसुरक्षाव्यवस्थायाः मध्ये ह्य: मतदानं पूर्णमभवत्। अस्मिन् चरणे पञ्चदश जनपदेषु त्रिचत्वारिंशत् आसनेभ्य: मतदानं जातम् ।झारखण्डराज्ये विधानसभा-निर्वाचनस्य प्रथमचरणस्य मतदानानन्तरं द्वितीय-चरणीयमतदानार्थं प्रचाराभियानं द्रुततां भजते। अनेके: वरिष्ठनेतार: स्वक्षेत्रे नैका: जनसभा: सम्बोधयिष्यन्ति। तत्रैव भाजपेतिदलीय: वरिष्ठनेता गृहमन्त्री च अमितशाह: अद्य एतस्मिन् राज्ये गिरीडीह-गाण्डेय-बोकारो क्षेत्रेषु प्रचारं प्रसारं च करिष्यति। झामुमो-दलस्य नेता मुख्यमन्त्री च हेमन्तसोरेन: देवघर-दुमका-बोकारो -स्थलेषु जनसमागमान् सम्बोधयिष्यति। द्वितीयचरणस्य अस्य मतदानं विंशति-दिनाङ्के समनुष्ठास्यते मतगणना च त्रयोविंशति दिनाङ्के प्रख्यापयिष्यते। अपरत्र महाराष्ट्रराज्येऽपि विभिन्नै: दलै: प्रचाराभियानं विधीयते। विंशति-दिनाङ्के एकस्मिन्नेव चरणे अत्र निर्वाचनं भविष्यति।

**प्रधानमन्त्री-बिहार:**

प्रधानमन्त्री नरेन्द्रमोदी श्व: जनजातिय-गौरव-दिवसावसरे बिहारराज्यस्य जमुई क्षेत्रं प्रति प्रस्थास्यति। क्षेत्रमिदम् आबा-भगवत: बिरसामुण्डाया: पञ्चाशदधिकैकशततमस्य जयन्ती-वर्ष-समारोहस्य प्रतीकमस्ति। श्रीमोदी अत्रावसरे श्व: प्रात: बिरसामुण्डाया: सम्माने एकस्या: स्मारकमुद्राया: प्रैष्यपत्रस्य चापि अनावरणं करिष्यति। अथ च अनेकासां विकासात्मक-परियोजनानां शिलान्यासम् उद्घाटनं च विधास्यति।

**जयशङ्कर:**

विदेशमन्त्री डॉ एस् जयशङ्कर: समुदीरितवान् यत् भारत-फिलीपींस-देशयो: सम्बन्धा: लोकतान्त्रिक-मूल्येषु बहुविध-लोकाचारेषु आर्थिकसमानतासु च आधारिता: वर्तन्ते। नवदिल्ल्यां भारत-फिलीपींस-राजनयिक-सम्बन्धानां पञ्चसप्ततितमे वर्षसम्पूर्त्यवसरे आयोजितं एकं कार्यक्रमं सम्बोधयन् डॉ जयशङ्कर: उक्तवान् यत् उभौ देशौ अन्ताराष्ट्रिय-विधि-मानदण्ड-नियमान् च स्थापयितुं गहनतया प्रतिबद्धौ स्त: इति। अपि च विगतेषु केषुचित् वर्षेषु देशयो: मध्ये महत्वपूर्णा वृद्धिरपि अवलोकिता।

**मेलकम्**

त्रिचत्वारिंशत्तमं भारत-अन्ताराष्ट्रिय-व्यापारमेलकम् अद्य नवदिल्ल्यां भारतमण्डपस्थाने समारप्स्यते। अस्य वर्षस्य मेलकस्य विषयो विद्यते- सप्तचत्वारिंशदधिकद्विसहस्रतमे वर्षे विकसित-भारतमिति। अस्मिन् वर्षे प्रमुखराज्यं झारखण्डं सहभागिनौ च बिहार-उत्तरप्रदेशराज्ये स्त:। अपि च चीन-मिस्र-ईरान-दक्षिणकोरिया-थाइलैण्ड-तुर्की-संयुक्त-अरब-अमीरात-देशान् समेत्य विभिन्ना: देशा: भागं स्वीकुर्वन्ति। मेलकमिदं अष्टादशदिनाङ्कं यावत् व्यवसायाय उद्घाटयिष्यते। तदनन्तरं सप्तविशंति- दिनाङ्कपर्यन्तं सामान्य-जनेभ्य: प्रचलिष्यति। एतत् मेलकं प्रात:काले दशवादनत: सायं सार्ध-सप्तवादनपर्यन्तम् उद्घाटितं भविष्यति।

**ऋतु-विज्ञान-विभागः**

भारतीयऋतुविज्ञानविभागेन उक्तं यत्, जम्मू-कश्मीरे हिमवृष्टेः कारणेन दिल्ली-सहित-उत्तरभारतेषु अन्येषु भागेषु वातावरणस्य स्थितिः परिवर्तिता भविष्यति। दिल्ली-हरियाणा-पञ्जाब-उत्तरप्रदेश चेत्यादिषु राज्येषु अद्य आरभ्य द्वि-त्रि-दिनानि यावत् हिमधूमिकायाः नारङ्गवर्णीया सञ्चेतना प्रख्यापिता।

**क्रिकेट**

**क्रिकेट प्रतिस्पर्धायाम् ह्यः रात्रौ भारतेन सेंचुरियन-इत्येतस्य सुपरस्पोर्ट-पार्क-इत्यत्र चतसृणां श्रृङ्खलानां तृतीये विंशति-प्रतिविंशति-अन्ताराष्ट्रिय - क्रिकेट्- द्वन्द्वे दक्षिणाफ्रीकादलम् एकादश धावनाङ्कैः पराजितम्।**

**।।इति वार्ताः।।**